वंशजा, स्त्री, (वंशे जायते इति। जन्+डः+टाप्।) वंशरोचना। इति शब्दरत्नावली॥ (अस्या गुणाः यथा,—
"वंशजा बृंहणी वृष्या बल्या स्वाद्वी च शीतला।
तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातकृच्छ्रजित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वंशतण्डुलः, पुं, (वंशजातस्तण्डुलः।) वेणुयवः। इति राजनिर्घण्टः॥

वंशधान्यं, क्ली, (वंशस्य धान्यम्।) वेणुयवः। इति राजनिर्घण्टः॥

वंशनालिका, स्त्री, (वंशनालोऽस्त्यस्या इति। वंशनाल+ठन्। टाप्।) वंशी। इति शब्दरत्नावली॥

वंशनेत्रं, क्ली, (वंशस्येव नेत्रमस्य।) इक्षुमूलम्। इति राजनिर्घण्टः॥

वंशपत्रः, पुं, (वंशस्य पत्राणीव पत्राण्यस्य।) नलः। इति राजनिर्घण्टः॥ (वंशस्य पत्रम्।) वंशस्य दलं, क्ली॥ (हरितालम्। यथा,—
"तालकं वंशपत्राख्यं कुष्माण्डसलिले क्षिपेत्।
सप्तधा वा त्रिधा वापि दध्यम्ले च वा पुनः॥
शोषयित्वा पुनः शुष्कं चूर्णयेत्तण्डुलाकृति।
ततः शरावके पात्रे स्थापयेत् कुशलो भिषक्॥
बदरीपत्रकल्केन सन्धिलेपञ्च कारयेत्।
अरत्निमधःपात्रं तावज्ज्वाला प्रदीयते॥
स्वाङ्गशीतं समुद्धृत्य माणिक्याभो भवेद्रसः॥"
इति वैद्यकरसेन्द्रसारसंग्रहे कुष्ठाधिकारे॥)

वंशपत्रकं, क्ली, (वंशपत्रमेव। स्वार्थे कन्।) हरितालम्। इति हेमचन्द्रः। ४। १२४॥

वंशपत्रकः, पुं, (वंशस्य पत्रमिवाकृतिरस्यति। इवार्थे कन्।) क्षुद्रमत्स्यविशेषः। इति शब्दमाला॥ वाँशपाता माछ इति भाषा॥ नलः। श्वेतेक्षुः। इति राजनिर्घण्टः॥

वंशपत्रपतितं, क्ली, सप्तदशाक्षरपादच्छन्दोविशेषः। यथा,—
"दिङ्मुनिवंशपत्रपतितं भ र न भ न ल गैः॥"
उदाहरणम्।
"नूतनवंशपत्रपतितं रजनिजलवं
पश्य मुकुन्द! मौक्तिकमिवोत्तममरकतगम्।
एष च तं चकोरनिकरः प्रपिबति मुदितो
वान्तमवेत्य चन्द्रकिरणैरमृतकणमिव॥"
वंशपत्रचरितेति केचित्। वंशदलमिति शम्भौ। इति छन्दोमञ्जरी॥

वंशपत्री, स्त्री, (वंशपत्र+गौरादित्वात् ङीष्।) नाड़ीहिङ्गुः। तृणविशेषः। तत्पर्य्यायः। वंशदला २ जीरिका ३ जीर्णपत्रिका ४। अस्या गुणाः। सुमधुरत्वम्। शिशिरत्वम्। पित्तरक्तदोषनाशित्वम्। रुच्यत्वम्। पशूनां दुग्धदायित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"वंशपत्री वेणुपत्री पिण्डा हिङ्गु शिवाटिका।
हिङ्गुपत्रीगुणा विज्ञैर्वंशपत्री च कीर्त्तिता॥"
इति भावप्रकाशः॥

वंशपीतः, पुं, (वंशः वंशपत्रमिव पीतः।) कणगुग्गुलुः। इति राजनिर्घण्टः॥

वंशपुष्पा, स्त्री, (वंशस्य पुष्पाणीव पुष्पाणि यस्याः।) सहदेवीलता। इति राजनिर्घण्टः॥

वंशपूरकं, क्ली, (वंशस्येव पूरकमस्य।) इक्षुमूलम्। इति राजनिर्घण्टः॥

वंशरोचना, स्त्री, (रोचते इति। रुच+नन्द्यादित्वात् ल्युः। टाप्। वंशस्य रोचना।) स्वनामख्यातवंशपर्व्वस्थितश्वेतवर्णौषधविशेषः। वंशलोचन इति भाषा। तत्पर्य्यायः। त्वक्क्षीरा २। इत्यमरः। २। ६। १०६॥ वंशलोचना ३। इति भरतः॥ तुगाक्षीरी ४ शुभा ५ वांशी ६ वंशजा ७। इति रत्नमाला॥ क्षीरिका ८। इति शब्दरत्नावली॥ तुगा ९ त्वक्क्षीरी १० शुभ्रा ११ वंशक्षीरी १२ वैणवी १३ त्वक्सारा १४ कर्म्मरी १५ श्वेता १६ वंशकर्पूररोचना १७ तुङ्गा १८ रोचनिका १९ पिङ्गा २० वंशशर्करा २१। अस्या गुणाः। रूक्षत्वम्। कषायत्वम्। मधुरत्वम्। हिमत्वम्। रक्तशुद्धिकारित्वम्। तापपित्तोद्रेकहरत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"वंशजा बृंहणी वृष्या बल्या स्वाद्वी च शीतला।
तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातकृच्छ्रजित्॥"
इति भावप्रकाशः॥

वंशलोचना, स्त्री, (वंशरोचना। रस्य लः।) वंशरोचना। इति हेमचन्द्रः॥ अस्या गुणाः।
"कषायमधुरा रूक्षा वातघ्नी वंशलोचना।
तुगाक्षीरी क्षयश्वासकासघ्नी मधुरा हिमा॥"
इति राजवल्लभः॥

वंशशर्करा, स्त्री, (वंशस्य शर्करेव।) वंशलोचना। इति राजनिर्घण्टः॥

वंशशलाका, स्त्री, (वंशस्य शलाकेव दारुत्वात्।) वीणाम्लूलम्। इति हेमचन्द्रः। २। २००॥ (वंशनिर्म्मिता शलाकेति मध्यलोपी समासः।) वंशनिर्म्मितशलाका च॥

वंशस्तनितं, } वंशस्थविलं, } क्ली, द्वादशाक्षरपादच्छन्दोविशेषः। यथा,—
"वदन्ति वंशस्थविलं जतौ जरौ॥"
उदाहरणम्।
"विलासवंशस्थविलं मुखानिलैः
प्रपूर्य्य यः पञ्चमरागमुद्गिरन्।
व्रजाङ्गनानामपि गानशालिनां
जहार मानं स हरिः पुनातु वः॥"
वंशस्तनितमपि क्वापि। इति छन्दोमञ्जरी॥

वंशाग्रं, क्ली, (वंशस्य अग्रम्। प्रथमजातत्वात्।) वंशाङ्कुरः। इति राजनिर्घण्टः॥

वंशानुचरितं, क्ली, (वंशस्य अनुचरितम्।) वंशचरित्रवर्णनम्। तत्तु पुराणस्य पञ्चलक्षणान्तर्गतलक्षणविशेषः। यथा, शब्दरत्नावल्याम्।
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम्॥"
(यथा, भागवते। ६। १। ४।
"तेषां वंशं पृथग्ब्रह्मन्! वंशानुचरितानि च।
कीर्त्तयस्व महाभाग! नित्यं शुश्रूषतां हि नः॥")

वंशाङ्कुरः, पुं, वंशस्याङ्कुरः। वांशेर कोँड़ा इति भाषा। तत्पर्य्यायः। करीरम् २ वंशाग्रम् ३ यवफलाङ्कुरः। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। अम्लत्वम्। कषायत्वम्। लघुत्वम्। शीतलत्वम्। पित्तास्रदाहकृच्छ्रघ्नत्वम्। रुचिकारित्वम्। तत्पर्व्वणो निर्गुणत्वञ्च। इति राजनिर्घण्टः॥

वंशिकं, क्ली, (वंशोऽस्त्यस्येति। ठन्।) अगुरु। इत्यमरः। २। ६। १२६॥

वंशिका, स्त्री, (वंशिक+टाप्।) अगुरु। इत्यमरटीकायां भरतः॥ वंशी। इति शब्दरत्नावली॥

वंशी, स्त्री, (वंशः कारणत्वेनास्त्यस्याः। अच्। गौरादित्वात् ङीष्।) मुरली। इति शब्दरत्नावली॥ वाँशी इति भाषा॥ (यथा, काव्यचन्द्रिकायाम्।
"निर्म्मिता कापि गोपीनां कुलशीलविनाशिनी।
विधिना पामरेणेयं न वंशी सुरवैरिणः॥")
कर्षचतुष्टयम्। इति राजनिर्घण्टः॥ वंशीवाद्यस्य विवरणम्। यथा,—
"तालेन राजते गीतं तालो वादित्रसम्भवः।
गरीयस्तेन वादित्रं तच्चतुर्व्विधमुच्यते॥
ततं शुषिरमानद्धं घनमित्थं चतुर्व्विधम्।
ततं तन्त्रीगतं वाद्यं वंशाद्यं शुषिरं तथा।
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम्॥"
शुषिरं यथा,—
"वंशोऽथ पारीमधुरीतित्तिरीशङ्खकाहलाः।
तोड़हीमुरलीबुक्काशृङ्गिकास्वरनाभयः॥
शृङ्गं कापालिकं वंशचर्म्म वंशस्तथा परः।
एते शुषिरभेदास्तु कथिताः पूर्व्वसूरिभिः॥
वर्त्तुलः सरलश्चैव पर्व्वदोषविवर्ज्जितः।
वैणवः खादिरो वापि रक्तचन्दनजोऽथवा॥
श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा।
राजतस्ताम्रजो वापि लौहजः स्फाटिकोऽथवा॥
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः।
शिल्पविद्याप्रवीणेन वंशः कार्य्यो मनोहरः॥
वंशैरेव ततोऽपीति मतङ्गमुनिनोदितम्।
ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्त्तिताः॥
तत्र त्यक्त्वा शिरोदेशादधो द्व्यङ्गुलमङ्गुलम्।
फुत्काररन्ध्रं कुर्व्वीत मितमङ्गुलिपर्व्वणा॥
पञ्चाङ्गुलानि संत्यज्यताररन्ध्राणि कारयेत्।
कुर्य्यात्तथान्यरन्ध्राणि सप्तसंख्यानि कौशलात्॥
बदरीबीजतुल्यानि संत्यज्यार्द्धार्द्धमङ्गुलम्।
प्रान्तयोर्म्मन्थनं कार्य्यं स्वराद्यैर्नादहेतवे॥
सिक्थकेन कला देया तेन सुस्वरता भवेत्।
पञ्चाङ्गुलोऽयं वंशः स्यादेकैकाङ्गुलिरहितः॥
षड़ङ्गुलानि नाम्ना स्यात् यावदष्टादशाङ्गुलम्।
फुत्कारताररन्ध्रस्य यावदङ्गुलिमन्तरम्।
तदेव नाम वंशस्य वांशिकैः परिकीर्त्त्यते॥